# .. shrI svAmi ayyappa stotram ..

# ॥ श्री स्वामि अय्यप्प स्तोत्रम् ॥

अरुणोदय सङ्काशं नीलकुण्डलधारिणीम् ।
नीलांबरधरं देवं वन्देऽहं ब्रह्मनन्दनम् ॥ १॥
चापबाणं वामहस्तेरौप्यवीत्रं च दक्षिणे ।
विलसत्कुण्डलधरं वन्देऽहं विष्णुनन्दनम् ॥ २॥
व्याघ्रारूढंरक्तनेत्रं स्वर्णमालाविभूषणम् ।
वीरपट्टधरं घोरं वन्देऽहं शंभुनन्दनम् ॥ ३॥
किङ्किण्योड्याण भूतेशं पूर्णचन्द्रनिभाननम् ।
किरावरूपशास्तारं वन्देऽहं पाण्ड्यनन्दनम् ॥ ४॥
भूतवेताल संसेव्यं काञ्चनाद्रिनिवासिनम् ।
मणिकण्ठ मितिख्यातं वन्देऽहं शक्तिनन्दनम् ॥ ५॥

इति श्री स्वामि अय्यप्प स्तोत्रं सुम्पूर्णम् ।

Proofread PSA Easwaran

Please send corrections to sanskrit@cheerful.com
Last updated January 18, 2020
http://sanskritdocuments.org